# Gorakshanatha Ashtakam

# ગોરક્ષનાથાષ્ટકમ્

## Document Information

Text title : Gorakshanatha Ashtakam 1

File name : gorakShanAthAShTakam.itx

Category : deities_misc, aShTaka

Location : doc_deities_misc

Acknowledge-Permission: vadicjagat.co.in

Latest update : October 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 14, 2022

*sanskritdocuments.org*

# ગોરક્ષનાથાષ્ટકમ્

યોગીન્દ્રામહિતોપદેશવિશદા દેશાર્થતત્ત્વં શિરો
    જ્ઞાનં કર્મ ચ દક્ષિણોત્તરગતા વક્ષોભ્યપક્ષાવસૌ ।
આત્મા યોગવરઃ સ્વરૂપવિષયા પુચ્છે પ્રતિષ્ઠાચિતો
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૧॥

દ્વૈતં દક્ષિણપક્ષ એષ વિહિતોऽદ્વૈતં વિવિચ્યોત્તરઃ
    પક્ષો યોગશિરો વિશેષપરમા દ્વૈતં તદાત્મા મહાન્ ।
પુચ્છં કેવલભાવ એક વિદુષાં હૃત્પદ્મનીડ મહ-
    ન્માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૨॥

ઐન્દ્રી દિક્ષભપૂર્વરૂપમતુલં પુચ્છં પ્રતીચી દિશો-
    દીતીયામ્યદિશાવતીવ વિપુલૌ દક્ષૌ હિ પક્ષૌ હિતો ।
આત્મેવાપદિશ દિશાસુ તરલે સૂર્યેન્દુબિમ્બે દૃશૌ
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૩॥

શ઼્રૃત્યન્તે કથિતં શિરો મહદિદં પક્ષોऽયમત્રોત્તરઃ
    સોયં દક્ષિણપક્ષ એવ વિપુલઃ સ્થૂલોऽયમાત્માચલઃ ।
સ્વચ્છં પુચ્છમિવેદમેવ ભુવન નીડં સરૂપાભિધં
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૪॥

પ્રાણોં દક્ષિણપક્ષ એષ વિતતી દાનો ભવત્યુત્તરઃ
    પક્ષો વ્યાનશિરો વિશાલહૃદયં મધ્યં સમાનોऽપરઃ ।
વાયુઃ પુચ્છમતુચ્છમેવ ભજતાં નીડં નિકાયો જડં
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૫॥

ભવ્યં સત્મૃતં ચ પક્ષયુગલં વાણી શિરઃ પ્રાણિના
    માત્માऽશેષવિશેષદોષરહિતઃ શ્રદ્ધેવ પુચ્છં ફલમ્ ।
સર્વં તુચ્છમનુપ્રવિશ્ય સહસા તુચ્છં પુરા વ્યાકૃતં
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૬॥

પશ્ચૈતદ્યજુરેવ સાઙ્ગમખિલં નિત્ય શિરો નિર્મલ-
    મૃક્સામાત્મકવેદયુગ્મમતુલં પક્ષદ્વયં પક્ષિણઃ ।
આત્માદેશપરા ઋગેવ સફલાઽથર્વૈવ પુચ્છં પરા
    માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૭॥

શ્રુત્યા જન્યમિન્દ પ્રિયં શિતશિરો મોદપ્રમોદાવહં
    પક્ષાયુત્તરદક્ષિણાવસુભૃદ્રા, નન્દોઽયમાત્માતુલઃ ।
પુચ્છં બ્રહ્મ તદાદિવાક્યગતયા વૃત્ત્યોપલક્ષ્યાત્મત-
    ન્માયા યસ્ય જગત્ત્રયં વિજયતે હંસઃ સ નાથો વિભુઃ ॥ ૮॥

માનેન માનેન સમાશ્રિતાનાં માનં સમાનં મમ નાથ ! ભૂયાત્ ।
માનેન માનેન સમાશ્રિતાનાં માનં સમાનં મમ નાથ ! ભૂયાત્ ॥ ૯॥

સ્વસ્તિ શ્રી શ્રેયઃ શ્રેણયઃ શ્રીમતાં સમુલ્લસન્તુરામ્ ॥

ઇતિ શ્રીરાજસ્થાનશેખરી ભૂતયોધપુરાધિરાજ
સિંહદેવવિરચિતં તૈત્તિરીયોપનિષદનુસારં સમ્પૂર્ણમ્ ॥

(હંસચિત્રમ્)

*Gorakshanatha Ashtakam*

pdf was typeset on December 14, 2022

Please send corrections to *sanskrit@cheerful.com*